
षष्ठः पाठः

# स्वामी विवेकानन्दः



'बहुजन हिताय, बहुजन सुखाय' इत्यस्मिन् कार्ये संलग्नस्य स्वामिविवेकानन्दस्य बाल्यकालस्य नाम 'नरेन्द्रनाथः' आसीत्। तस्य जन्म जनवरिमासस्य द्वादशे दिनाङ्के 1863 ख्रिस्ताब्दे (12 जनवरी, 1863) कोलकातानगरे अभवत्। तस्य मातुः नाम 'भुवनेश्वरीदेवी' आसीत्। तस्य पिता विश्वनाथदत्तः लब्धप्रतिष्ठः अभिभाषकः आसीत्। नरेन्द्रनाथः बाल्यकालादेव संस्कृतानुरागी, कुशाग्रबुद्धिः, मल्लविद्यादिसु क्रीड़ासु पारङ्गतः धार्मिकश्चासीत्।

तस्मिन् काले रामकृष्णपरमहंसः अद्वितीयाध्यात्मिकज्ञानपुञ्जस्य स्रोतः आसीत्। तस्य प्रभावेण प्रभावितः नरेन्द्रनाथः तस्मादेव परिव्राजकदीक्षां प्राप्नोत्। दीक्षानन्तरं सः स्वामी विवेकानन्दः इति नाम्ना प्रसिद्धोऽभवत्। ततः सः स्वकीयज्ञानदीप्त्या सदुपदेशैः जनान् अध्यात्मपरायणमकरोत्। तस्यावधारणा आसीत् यत् प्रेम्णा, सत्येन, पराक्रमेण च कार्याणि सिद्ध्यन्ति। तत्कुरु पौरुषम्। आत्मभावस्य विकासः एव कर्म। अनात्मभावस्य विकासः एवाकर्म। दौर्बल्येन किमपि न भवति। अतः सबलो भव।

जीवनस्यार्थः उन्नतिरस्ति। उन्नतेः तात्पर्यं हृदयस्यौदार्यमस्ति। परोपकारः एव जीवनगतिः। स्वार्थभावः एव मृत्युः। प्रेमभावः एव जीवनम्। द्वेषभावः एव मृत्युः। प्रेमभावः एव भक्तिः, ज्ञानं मुक्तिश्चास्ति। प्रेम विना नेदं यदिदमुपासते।

सर्वथा दरिद्रनारायणो सेवितव्यः। यतोहि बुभुक्षितः, दीनः, उपेक्षितः, दिव्याङ्गजनः, दुर्बलः एव साक्षादीश्वरः। अतः एतेषामुपासना एव ईश्वरस्याराधना अस्ति।

चारित्र्यबलं धारयत। अनेनैव सर्वत्र विजयो भविष्यति। दाता भव। प्रतिग्रहणस्य कामनां मा कुरु। वसन्तवल्लोकहितं चरत। परोपकारः परमपवित्रं कार्यमस्ति। परोपकारेण चित्तं शुद्ध्यति। अनेनैव ईश्वरप्राप्तिः सम्भवा।

सः वेदान्तप्रचाराय स्वकीयाखिलं जीवनं समर्पयामास। तेन हिन्दुधर्मः संस्कृतिश्च प्रसारिते। सः न केवलं परिव्राजकः, अपितु परोपकारी, दाता, लोकसेवकः महान् देशभक्तश्चासीत्। शिकागोनगरे विश्वधर्मसम्मेलने सः भारतस्य प्रतिनिधिः अभवत्। देशविदेशेषु तस्य बहवः शिष्याः अभवन्। आङ्ग्लदेशीया "कुमारी नोबल" या अनन्तरं 'भगिनी निवेदिता' इति नाम्ना प्रसिद्धा, तस्य प्रिया शिष्या

अभवत्। सः यूनां कृते विशिष्टप्रेरकः पथप्रदर्शकश्चासीत्। भारतीयस्वतन्त्रतासङ्ग्रामेऽपि तस्य ऊर्जस्वलानि भाषणानि स्वाधीनतासैनिकानां कृते प्रेरणास्पदानि। 'उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत' इत्युपनिषदः ध्येयवाक्यं सः जीवनेऽधारयत्।

अहर्निशं ब्रह्मकर्मसाधनां साध्यमानः एव जुलाई मासस्य चतुर्थे दिनाङ्के 1902 ख्रिस्ताब्दे (4 जुलाई, 1902) सः ब्रह्मलीनो जातः। सः न केवलं भारते अपितु, विदेशेष्वपि प्रसिद्धः। तेन भारतस्य प्राचीनगौरवं विदेशेषु स्थापितम्। रवीन्द्रनाथटैगोरः कथयति यत् यदि कोऽपि भारतीयसंस्कृतिं ज्ञातुमिच्छति तर्हि प्रथमः तेन स्वामीविवेकानन्दविषये पठितव्यम्।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| लब्धप्रतिष्ठः | – | ख्याति प्राप्त | बुभुक्षिताः | – | भूखे |
| अभिभाषकः | – | वकील | औदार्यम् | – | उदारता का गुण |
| कुशाग्रबुद्धिः | – | तीव्र बुद्धि | प्रतिग्रहणस्य | – | दान के बदले ग्रहण करने की/का |
| परिव्राजकदीक्षाम् | – | संन्यास की दीक्षा को | ऊर्जस्वलानि | – | तेजस्वी |
| स्वकीयज्ञानदीप्त्या | – | अपने ज्ञान के प्रकाश से | ब्रह्मलीनः | – | ब्रह्म में लीन |
| मल्लविद्यादिषु | – | कुश्ती आदि विद्याओं में | वसन्तवल्लोकहितं | – | वसन्त के समान लोक कल्याणकारी |
| अध्यात्मपरायणम् | – | अध्यात्म की ओर अभिमुख | | | |
| प्राप्य वरान्निबोधत | – | श्रेयस्कर लक्ष्य को प्राप्त कर शांत हो | | | |

## व्याकरणम्

| | | | | | | |
|---|---|---|---|---|---|---|
| धार्मिकश्चासीत् | = | धार्मिकः | + | च | + | आसीत्। |
| अध्यात्मपरायणमकरोत् | = | अध्यात्मपरायणम् | + | अकरोत्। | | |
| हृदयस्यौदार्यमस्ति | = | हृदयस्य | + | औदार्यम् | + | अस्ति। |
| मुक्तिश्चास्ति | = | मुक्तिः | + | च | + | अस्ति। |
| यदिदमुपासते | = | यत् | + | इदम् | + | उपासते। |
| वसन्तवल्लोकहितम् | = | वसन्तवत् | + | लोकहितम्। | | |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत –**

   क. स्वामिविवेकानन्दस्य बाल्यकालस्य नाम किम् आसीत्?

   ख. स्वामिविवेकानन्दस्य मातुः नाम किम् आसीत्?

ग. नरेन्द्रनाथस्य पितुः नाम किम् आसीत्?

घ. नरेन्द्रनाथस्य जन्म कस्मिन् नगरे अभवत्?

ङ. नरेन्द्रनाथस्य गुरोः नाम किम् आसीत्?

**2. एकवाक्येन उत्तरं लिखत –**

क. नरेन्द्रनाथस्य जन्म कदा अभवत्?

ख. शिकागोनगरे विश्वधर्मसम्मेलने भारतस्य प्रतिनिधिः कः अभवत्?

ग. स्वामी विवेकानन्दः कदा ब्रह्मलीनोऽभवत्?

घ. रवीन्द्रनाथटैगोरस्य किं कथनम् अस्ति?

ङ. यूनां प्रेरकः पथप्रदर्शकश्च कः?

**3. उचितं योजयत –**

| | (अ) | (ब) |
|---|---|---|
| क. | नरेन्द्रनाथः एव | विश्वनाथदत्तः |
| ख. | नरेन्द्रनाथस्य माता | स्वामी विवेकानन्दः |
| ग. | नरेन्द्रनाथस्य पिता | रामकृष्णपरमहंसः |
| घ. | नरेन्द्रनाथस्य गुरुः | भगिनी निवेदिता |
| ङ. | नरेन्द्रनाथस्य प्रिया शिष्या | भुवनेश्वरीदेवी |

**4. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत—**

क. पौरुषं कुरु। [ ]

ख. आत्मभावस्य विकासः एव कर्म। [ ]

ग. जीवनस्यार्थः उन्नतिः नास्ति। [ ]

घ. स्वार्थभावः एव मृत्युः। [ ]

ङ. परोपकारः अपवित्रं कार्यमस्ति। [ ]

**5. उचितपदेन रिक्तस्थानं पूरयत –**

क. प्रतिग्रहणस्य कामनां ......................। (कुरु / मा कुरु)

ख. चारित्र्यबलं .....................। (वारयत / धारयत)

ग. नरेन्द्रनाथस्य पिता ....................आसीत्। (भाषकः / अभिभाषकः)

घ. अनात्मभावस्य विकासः एव ....................। (कर्म / अकर्म)

ङ स्वामिविवेकानन्दस्य जन्म .................... अभवत्। (कोलकातानगरे / मुम्बईनगरे )

**6. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत –**

क. दीक्षानन्तरम्।

ख. प्रसिद्धोऽभवत्।

ग. एवाकर्म।

घ. तस्यावधारणा।

ङ अनेनैव।

च. कार्यमस्ति।

**7. नामोल्लेखपूर्वकं समासविग्रहं कुरुत –**

क. लोकसेवकः।

ख. परोपकारः।

ग. परिव्राजकदीक्षाम्।

घ. जीवनगतिः।

ङ. ईश्वरप्राप्तिः।

**8. मूलशब्दं लिङ्गं विभक्तिं वचनं च लिखत –**

क. ज्ञानम्

ख. कार्यम्

ग. अनेन

घ. ईश्वरः

ङ दीनः

च. क्रीडासु

छ. एतेषाम्

ज. सः

**9. अव्ययानां वाक्यप्रयोगं कुरुत —**

च, एवम्, मा, तदा, यदि।

**10. 'स्वामी विवेकानन्दः' इति विषयमवलम्ब्य संस्कृते दशवाक्यानि लिखत।**

**योग्यताविस्तारः –**

- स्वामिविवेकानन्दस्य साहित्यं पठत।
- रामकृष्णमिशनविषये जानत।
- स्वामिविवेकानन्दस्योपदेशान् जीवने दधत।

*इदं राष्ट्राय इदं न मम।*